## चतुर्दशः पाठः

# लोकमान्यतिलकः



लोकमान्यबालगङ्गाधरतिलकः महान् देशभक्तः आसीत्। महाराष्ट्रप्रान्ते रत्नगिरिमण्डले जुलाईमासस्य त्रयोविंशतितमे दिनाङ्के, 1856 ख्रिस्ताब्दे तस्य जन्म अभवत्। तस्य जनकः गङ्गाधरः कुशलशिक्षकः लेखकः च आसीत्।

तिलकः गणितस्य, संस्कृतभाषायाः, विधिशास्त्रस्य च प्रकाण्डपण्डितः आसीत्। सः छात्रजीवने एव निश्चयम् अकरोत् यत् ''अहं शासकीयसेवां न करिष्यामि।'' आजीवनं भारतस्य स्वतन्त्रतायाः कृते सङ्घर्षं करिष्यामि च इति।

सः अघोषयत्, 'स्वराजः मम जन्मसिद्धः अधिकारः अस्ति इति।'

तिलकः राष्ट्रसेवायाः कृते संलग्नः अभवत्। जनजागरणस्य कृते सः शिवराजोत्सवस्य गणेशोत्सवस्य च प्रारम्भम् अकरोत्। सः केसरी-मराठेति समाचारपत्रयोः सम्पादनं च अकरोत्। तिलकमहोदयस्य प्रभावेण देशे स्वतन्त्रतायै नवचेतना सञ्जाता। सः लोकमान्यः इति उपाधिना विभूषितः। तस्य प्रभावम् असहमानाः आङ्ग्लाः तस्योपरि राजद्रोहस्य मिथ्याभियोगं न्यायालये प्रस्तुतवन्तः। न्यायाधीशेन सः षट्वर्षभोग्येन कारावासेन दण्डितः। सः निर्भयम् अवदत्, ''अस्मात् न्यायालयात् परमेश्वरस्य न्यायालयः उच्चतरः अस्ति। तस्मिन् अहं निर्दोषः अस्मि। कारागारे सः 'गीतारहस्य' नामकं ग्रन्थम् अरचयत्।

सः महान् कर्मयोगी आसीत्। सः अकथयत्, ''उद्यमहीनस्य सहायतां परमात्मा अपि न करोति। कर्मशीलस्य सहायतां प्रभुः करोति।''

अगस्तमासस्य प्रथमदिनाङ्के 1920 तमे वर्षे सः दिवंगतः। सत्यम्! बालगङ्गाधरतिलकमहोदयः अस्माकं देशस्य गौरवम्।

केनापि सुष्ठु उक्तम्, ''तिलकः'' भारतभालस्य 'तिलकम्' इव भाति।

### शब्दार्थाः

| | | | |
|---|---|---|---|
| जनकः | = पिता | कृते | = के लिए |
| असहमानाः | = सहन न करने वाले | आङ्ग्लाः | = अङ्ग्रेज |
| तस्योपरि | = उनके ऊपर | मिथ्या | = झूठा |

| | | | | | |
|---|---|---|---|---|---|
| प्रस्तुतवन्तः | = | प्रस्तुत किया | निर्दोषः | = | दोषरहित |
| अरचयत् | = | रचना की | दिवङ्गतः | = | मृत्यु हो गई |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) लोकमान्यतिलकः कः आसीत्?

(ख) तिलकः केन उपाधिना विभूषितः?

(ग) तिलकस्य प्रभावेण देशे का सञ्जाता?

(घ) तिलकः कस्मिन् मासे दिवङ्गतः?

(ङ) कस्य सहायतां प्रभुः करोति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) तिलकस्य जन्मस्थानं कुत्र अस्ति?

(ख) तिलकस्य जनकः कः आसीत्?

(ग) तिलकः छात्रजीवने कं निश्चयम् अकरोत्?

(घ) तिलकेन कः ग्रन्थः रचितः?

(ङ) तिलकः किम् अघोषयत्?

**3. रेखाङ्कितपदम् आश्रित्य प्रश्ननिर्माणं कुरुत–**

(क) लोकमान्यतिलकः महान् देशभक्तः आसीत्।

(ख) तिलकः राष्ट्रसेवायाः कृते संलग्नः अभवत्।

(ग) जनजागरणस्य कृते सः शिवराजोत्सवस्य गणेशोत्सवस्य च प्रारम्भम् अकरोत्।

(घ) कर्मशीलस्य सहायतां प्रभुः करोति।

(ङ) तिलकः भारतभालस्य 'तिलकम्' इव भाति।

**4. अधोलिखितपदानां पर्यायवाचिपदानि लिखत–**

(क) जनकः (ख) निर्भयः (ग) मिथ्या

(घ) परमेश्वरः (ङ) भालः

**5. अधोलिखितपदानां विलोमपदानि लिखत–**

(क) निर्दोषः (ख) स्वतन्त्रता (ग) अस्ति

(घ) जन्म (ङ) उद्यमहीनः

6. **उचितशब्देन रिक्तस्थानानि पूरयत–**

(लोकमान्यः, भारतभालस्य, अस्माकं, संलग्नः, अगस्तमासस्य)

(क) तिलकः राष्ट्रसेवायाः कृते ............... अभवत्।

(ख) तिलकमहोदयः ............... देशस्य गौरवम्।

(ग) ............... प्रथमदिनाङ्के 1920 तमे वर्षे सः दिवङ्गतः।

(घ) तिलकः ............... 'तिलकम्' इव भाति।

(ङ) सः ............... इति उपाधिना विभूषितः।

7. **सन्धिं कुरुत–**

क) शिवराज + उत्सवः

ख) गणेश + उत्सवः

ग) तस्य + उपरि

घ) परम + आत्मा

ङ) परम + ईश्वरः

8. **चतुर्थीविभक्तेः स्थाने षष्ठीविभक्त्या सह 'कृते' इति शब्दं योजयित्वा लिखितुं शक्नुमः।**

**उदाहरणानुसारं लिखत–**

**यथा** देशाय – देशस्य कृते

(क) त्यागाय

(ख) ग्रामाय

(ग) नगराय

(घ) विद्यालयाय

(ङ) समाजाय

**योग्यताविस्तारः –**

- पाठादतिरिक्तानि बालगङ्गाधरतिलकस्य विशिष्टाणि कार्याणि प्रसिद्धानि लिखत।
- पाठे आगतानि पुंल्लिङ्ग–स्त्रीलिङ्ग–नपुंसकलिङ्ग–पदानि चित्वा सूचीनिर्माणं कुरुत।

*विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता।*